# प्रातिशाख्यग्रन्थाः वैदिकव्याकरणञ्च

**जानकीशरणः**

**कूटशब्दाः –** [प्रातिशाख्यम्, वैदिकव्याकरणम्, पाणिनिः, अष्टाध्यायी, निरुक्तम्, लौकिकवैदिकशब्दाः]

**शोधसारः –** [समग्रे वैदिकवाङ्मये व्याकरणशास्त्रस्य उल्लेखः प्राप्यते। अनेन ज्ञायते यत् वैदिककालेऽपि व्याकरणशास्त्रं पूर्णरूपेण प्रचलितमासीत्। महर्षिपाणिनेः प्राक्कालीनानां पञ्चाशीतिवैयाकरणानां नामानि प्राप्यन्ते, तत्रापि दशसङ्ख्यकानां वैयाकरणानाम् नामामि तत्र भगवान् पाणिनिः स्वयं सूत्रयामास। पाणिनिप्रणीता अष्टाध्यायी समस्तान् वैदिकप्रयोगान् साधयति। यद्यपि वैदिकप्रयोगानां सिद्धिः प्रातिशाख्यग्रन्थेष्वपि उक्तास्ति तथापि पाणिनीयव्याकरणदृष्ट्या प्रातिशाख्यग्रन्थानां व्याकरणशास्त्रस्य एकदेशत्वात् वैदिकव्याकरणमिति व्यपदेशोऽस्ति। प्रातिशाख्यानि वैदिकपदानां सुसाधुत्वं सम्पाद्य वेदानां रक्षणं कुर्वन्ति। अतः वैदिकप्रयोगसिद्धये अस्ति प्रातिशाख्यानां महद्योगदानमिति तु निश्चप्रचम्। तत्र इयं जनानां भ्रान्तिरस्ति यत् पाणिनिप्रणितानि सूत्राणि वैदिक-लौकिकभेदेन वर्गीकृतानि सन्ति। तैः सूत्रैः सर्वोऽपि वैदिकप्रयोगो न सिद्ध्यतीति भ्रान्तिं निराकृत्य अष्टाध्यायी वैदिकलौकिकोभयप्रयोगं समं साधयति इति निरूपणस्य कश्चन प्रयासोऽत्र विहितो वर्तते।[1]]

संस्कृतस्य वैदिकलौकिक इति भेदस्तु सर्वविदितमेव। इयं वैदिकी भाषा, व्याकरणनियमानां सन्धिसमासप्रत्ययोपसर्गागमादेशादीनां, संस्कृतभाषापेक्षया, शैथिल्येन स्वीयेन चोदात्तस्वरूपेण बहुविधभेदान् बिभ्राणा दृग्गोचरी भवति। तत्र वैदिकभाषाया अन्यतमं वैशिष्ट्यं स्वरसंवलितत्वं तु लौकिकभाषया भेदेषु मूर्धन्यत्वेन ऊरीक्रियते। लौकिकीयं संस्कृतभाषा उदात्तादिस्वररहिता, वैदिकी च उदात्तादिस्वरसंयुक्तेति महानयनयोर्भेदः। महावैयाकरणेन भगवता पाणिनिना स्वकीये व्याकरणे सामान्यभाषाया विश्लेषणेन सहैव वैदिकस्वरविधानमपि सम्यग्विचारितमस्ति। किञ्च पाणिनीयव्याकरणस्य लाघवं तु विद्वत्सु किंवदन्तीरूपेण प्रथितमेव। “अर्धमात्रालाघवं पुत्रोत्सवं मन्यन्ते वैयाकरणाः[2]” इति। तेन लाघवानुरोधेनैव पाणिनीयव्याकरणे विश्लेषितं वैदिकं स्वरविधानमपि लाघवेनैव प्रतिपादितमस्ति। अत एव प्रस्तुतेऽस्मिन् शोधप्रपत्रे पाणिनीयव्याकरणदिशा वैदिकस्वरविधानं लाघवेन परामृश्यते।

वैदिककालादारभ्य महर्षिपाणिनिपर्यन्तं व्याकरणशास्त्रस्य समृद्धा व्यवस्थिता च परपम्परा आसीत्। महर्षेः पाणिनेः प्राक्कालीनानां बहूनां वैयाकरणां न केवलं नामानि उपलभ्यन्ते अपि तु तेषां व्याकरणशास्त्रविषयकानि प्रमाणान्यप्युपलभ्यन्ते। साक्षात् भगवता पाणिनिना दशसङ्ख्यकानां वैयाकरणानां नामानि सूत्रितान्यष्टाध्याम्[3]। वाल्मीकिरामायणे नवविधं व्याकरणशास्त्रमुक्तमस्ति।[4] बोपदेवव्याकरणेऽपि उक्तम्–

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः॥ इति।

तत्र पदमञ्जर्यां हरदत्तेनापि अयमेव विषयो न्यगादि- “कथं पुनरिदमाचार्येण पाणिनिनावगतमेते साधव इति? आपिशलेन पूर्वव्याकरणेन। ...पाणिनिरपि स्वकाले शब्दान् प्रत्यक्षयन् आपिशलादिना पूर्वास्मिन्नपि काले

---

[1] पत्त्रमिदं पञ्जावविश्वविद्यालयविभागः, विश्वेश्वरानन्द-विश्वबन्धु-संस्कृत-भारतभारती-अनुशीलन्-संस्थानम्, साधु-आश्रमः, होशियारपुरम् इत्यनेन आयोजितायां “महर्षिविश्वामित्रवेदवेदाङ्गकार्यशालाराष्ट्रियसङ्गोष्ठी च” इत्यत्र पठितम्। तत्र चास्य पत्त्रविषये यः संशोधनात्मको विमर्शोऽभूत्, तदपि पत्त्रेऽस्मिन् संयोजितमस्ति।

[2] परिभाषेन्दुशेखरः, पृ. २३४

[3] आपिशलिः (अष्टाध्याम् ६-१-९२), काश्यपः (१-२-२५, ८-४-६७), गार्ग्यः (७-३-९९, ८-३-२०, ८-४-६७) गालवः (६-३-६२, ७-१-७४, ७-३-९९, ८-४-६७), चाक्रवर्मन् (६-१-१३०), भारद्वाजः (७-२-६२), शाकटायनः (३-४-११, ८-३-१८, ८-४-५०), शाकल्यः (१-१-१६, ६-१-१२७, ८-३-१९, ८-४-५१), सैनकः (५-४-११), स्फोटायनः (६-१-१२३)

[4] “सोऽयं नवव्याकरणार्थवेत्ता ब्रह्मा भविष्यत्यपि ते प्रसादात्” (उत्तरकाण्डम्, ३६/४८)

सतामनुसन्धत्ते। एवमापिशालिः। अनादिरयं संसारः।[5]" अपि च रामायणस्य टीकाकारो देवबोधो ब्रूते यद् माहेन्द्रव्याकरणं समुद्रवत् व्यापकमस्ति, तत्र पाणिनिव्याकरणन्तु गोष्पदवद्वर्तते।[6] अस्य माहेन्द्रव्याकरणस्य अथवा ऐन्द्रव्याकरणस्य परिमाणमति विशालमासीत्।

सम्प्रति लोके त्रिविधं व्याकरणम् उपलभ्यते –

वैदिकव्याकरणम् – प्रातिशाख्यादि।

लौकिकव्याकरणम् – कातन्त्रादि।

लौकिकवैदिकोभयव्याकरणम् – पाणिन्यादि।

वैदिकभाषाविवेचनाय विशेषरूपेण विहिताः प्रातिशाख्यग्रन्थास्तु वेदस्य कस्याश्चिद् विशिष्टशाखाया भाषाविश्लेषणपराः व्याकरणग्रन्था इति कृत्वा तत्र सविस्तरेण भाषाया विश्लेषणं विहितमस्ति। निरुक्ते शब्दार्थस्य चिन्तनं कृतं वर्तते। निरुक्तग्रन्थेषु प्रत्येकं शब्दस्य व्युत्पत्तिः उक्तास्ति। तत्रापि प्रत्येकं शब्दस्य निर्वचने अनेके धातवः कथिताः सन्ति। यथा हस्तो हन्तेः। वीरो वेतेर्वा वीरयतेर्वा। अध्वरं युनक्ति, अध्वरस्य नेता, अध्वरं कामयते वा अध्यवर्युः इत्यादिरूपेण। तत्र शब्दस्य प्रकृतिप्रत्ययव्याकृतिरूपव्युत्पत्तेः उल्लेखो नास्ति। प्रातिशाख्यानि वैदिकव्याकरणत्वेन प्रथितानि सन्ति लोके। तत्र संज्ञा, परिभाषा, स्वरः, शिक्षा, उच्चारणं, दोषः, ध्वन्यागमः, छन्द इत्यादिनां प्राधान्येन उल्लेखो भवति। इमे एव प्रातिशाख्यानां मुख्यप्रतिपाद्यविषयाः वर्तन्ते। प्रातिशाख्यपाणिनिव्याकरणयोः अयं महान् भेदो वर्तते यत् प्रातिशाख्यग्रन्थे सिद्धपदानामेव स्वरनिर्देशः क्रियते, परन्तु पाणिनीयव्याकरणे प्रकृतिप्रत्ययविभागं विधाय विशिष्टप्रक्रियया स्वरनिर्देशः क्रियते। अतः प्रातिशाख्यमपि स्वरस्वरूपबोधनार्थं व्याकरणमेव समाश्रयति। परिणामस्तु उभयत्र समानमेव।

एवरूपेण प्रातिशाख्यानि पदानां प्रकृत्यनुसारेण संहितासु विपर्ययानि वर्णयन्ति। तथा चोक्तं महाभाष्ये– "सर्ववेद परिषदं हीदं शास्त्रम्। तत्र नैकः पन्थाः शक्य आख्यातुम्[7]" इति। तत्र "अध्येतृसंघः परिषत्। तत्र भवं पारिषदम्[8]" इति व्याख्यायति कैयटः। अनेन रूपेण ज्ञायते यत् प्रातिशाख्यानि पदप्राकृतिकानि सन्ति। किञ्च तत्र शिक्षाया अपि सूक्ष्मं वर्णनं कृतमस्ति। महाभाष्ये "तस्यादित उदात्तमर्धह्रस्वम् (१-२-३२)" इति सूत्रभाष्ये महाभाष्यकाराः प्रातिशाख्यव्याकरणयोः अन्तरं स्पष्टयन्ति। स्वरिते कियान् अंश उदात्त अस्ति, कियान् च अनुदात्तोऽस्ति इति वर्णयन् भाष्यकाराः वदन्ति-"आचार्यः सुहृद्भूत्वा अन्वाचष्टे इयदुदात्तमियदनुदात्तमिति।" तत्र पुनः आक्षिपन्ति "यद्ययमेवं सुहृत् किमन्यान्यप्येवंजातीयकानि नोपदिशाति। कानि पुनस्तानि? स्थानकरणानुप्रदानानि। व्याकरणं नामेयमुत्तरा विद्या। सोऽसौ छन्दःशास्त्रेस्वभिविनीत उपलब्ध्याधिगन्तुमुत्सहते[9]" इति। वस्तुतः प्रातिशाख्यं छन्दःशास्त्रमस्ति, व्याकरणन्तु अस्य उत्तरा विद्याऽस्ति। प्रातिशाख्यानां प्रयोजनं पदपाठः क्रमपाठश्च स्तः। प्रकृतिस्तु संहितापाठः, विकृतिश्च पदपाठः। एवञ्च प्रातिशाख्येषु पदानां प्रकृतिप्रत्ययविभागं कृत्वा व्युत्पत्तिः नोक्ता। यतो हि प्रातिशाख्यानां प्रकृतिः अस्ति पदम्, व्याकरणस्य प्रकृतिस्तु धातुः प्रातिपदिकञ्च।

सम्प्रति उपलभ्यमानेषु व्याकरणेषु कातन्त्रादिव्याकरणेन लौकिकशब्दानां सिद्धिर्भवति। आपिशलेः अक्षरतन्त्रादि अपि प्रातिशाख्यवत् अस्ति। एवञ्च लौकिकवैदिक इति उभयविधशब्दानां सिद्धिः येन व्याकरणेन भवति तदस्ति पाणिनिमुनिप्रणीता अष्टाध्यायी। अत एवोक्तं भगवता महाभाष्यकारेण- "अथ शब्दानुशासनम्। केषां शब्दानाम्। लौकिकानां वैदिकानाञ्च।[10]" तत्र कैयटमतानुसारेण शब्दानां लौकिकवैदिकभेदो नास्ति। वैदिकशब्दोऽपि

---

5 पदमञ्जरी

6 "यान्युज्जहार माहेन्द्राद् व्यासो व्याकरणार्णवत्। पदरत्नानि किं तानि सन्ति पाणिनिगोष्पदे॥"

7 महाभाष्यम्

8 म

9 महाभाष्यम्, द्वितीयो खण्डः, पृ. २८

10 महाभाष्यम्, प्रथमो खण्डः, पृ. ९

लौकिक एवास्ति। तथा चोक्तम् "वैदिकानाम् अपि लौकिकत्वे प्राधान्यख्यापनाय पृथगुपादानम्। यथा ब्राह्मणा आयाता वसिष्ठोऽप्यायात इति वसिष्ठस्य।[11]"

वस्तुतः प्रारम्भे वैदिकलौकिकभेदेन शब्दानां विभागो नासीत्। "प्रयोगचोदनाभावादर्थैकत्वमविभागात्[12]" इति मीमांसासूत्रव्याख्याने उक्तञ्च शबरस्वामिना—"य एव लौकिकास्त एव वैदिकास्त एव च तेषामर्थाः।" इति। वाजसनेयप्रातिशाख्ये अपि कात्यायनमुनिना वैदिकलौकिकशब्दानामभेदः प्रतिपादितः "न समत्वात्" इति सूत्रेन। सूत्रस्यास्य व्याख्याने उवटानन्तदेवाभ्यामुक्तम् "य एव वैदिकास्त एव लौकिकास्त एव च तेषामर्थाः" इति। किञ्च यास्कोऽपि वैदिकशब्दानाम् अर्थवत्वं लौकिकवैदिकशब्दानां समानत्वात् निरूपयति।[13]

पाणिनिव्याकरणे लौकिकवैदिकशब्दानां सिद्धिः युगपत् कृता वर्तते। यथा अष्टाध्याय्यां "ह्वः सम्प्रसारणम्" (६-१-३२) "अभ्यस्तस्य च" (६-१-३३) इति सूत्रद्वयेन ह्वेञ् धातोः सप्रसारणं विधीयते। तेन अजूहवत्, जुहाव, जुहूषति इत्यादिरूपाणां सिद्धिर्भवति। तदनन्तरं "बहुलं छन्दसि[14]" इत्यनेन वेदे ह्वेञ् धातोः सम्प्रसारणे सति "देवीं सरस्वतीं हुवे" इति रूपं सिद्ध्यति, सम्प्रसारणाभावे च "ह्वामि" इति रूपम्। "प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने[15]" सूत्रमनेन "प्रेष्य ब्रुवोर्हविषो" इति शब्देषु कर्मणः चतुर्थीविभक्तिः विधीयते, किन्तु वेदे अत्र कर्मणः षष्ठीविभक्तिः श्रूयते, अतः अष्टाध्याय्याम् एतस्य सूत्रस्यानन्तरं "चतुर्थ्यर्थे बहुलं छन्दसि[16]" इति सूत्रं पठितम्। अपि च एकमुदारणम् इतोऽपि पश्यामः - "घञपोश्च" (२-४-३८) सूत्रेण अद् धातोः घसादेशो भवति। तदनन्तरं "बहुलं छन्दसि" (२-४-३९) इति सूत्रेण इयं व्यवस्था वेदे विकल्पेन भवति इत्युक्तं भवति। "ब्रह्मभ्रूणवृत्रेषु क्विप्" (३-२-८७) सूत्रेण क्विप् प्रत्ययं विधीय ब्रह्महा, भ्रूणहा इत्यादिरूपाणि भवन्ति, तदनन्तरं साक्षात् "बहुलं छन्दसि" (३-२-८८) इति सूत्रेण हन् धातोः विधीयमानं क्विप् प्रत्ययः वेदे विकल्पेन भवति इति उक्तं भवति येन मातृहा, मातृघातः इत्यादिरूपाणि सिद्ध्यन्ति।

पाणिनीयव्याकरणे वैदिकशब्दानां पृथग्विधानो नास्ति। यथा ब्राह्मणः, ब्राह्मणौ इति प्रयोगद्वयं यथा लोके भवति तथा वेदेऽपि। किन्तु तत्र जस् प्रत्ययपरकत्वात् "आज्जसेरसुक्" (७-१-५०) इत्यनेन वेदे "असुक्" विधानं भवति तेन ब्राह्मणासः, जनासः इत्यादि प्रयोगाः भवन्ति। एवञ्च लौकिकशब्दानाम् इयं व्यवस्था वेदे वैकल्पिका भवति। अष्टाध्याय्यां लौकिकशब्दानां सिद्धिः येन प्रकारेण भवति, तेनैव प्रकारेण वैदिकशब्दानामपि सिद्धिर्भवति। तत्र २६३ सूत्राणि वैदिकप्रक्रियायाः सन्ति किन्तु, एतेभ्यो व्यतिरिक्तं यत्किमपि सिद्ध्यति तद्वेदे लोके च समानमेव भवति। "बहुलं छन्दसि" सूत्रमिदमष्टाध्याय्याम् एकादशवारमुक्तमस्ति[17]। "बहुलं छन्दसि", "बहुलं छन्दस्य-माङ्योगेऽपि (६-४-७५)" इत्यादिसूत्राणि सिद्धान्तकौमुद्यामन्ते सन्ति, अतः तैरर्थप्रकाशनं न सम्भवति। इमान्येव सूत्राणि लौकिकसूत्रैः सह स्वकीयार्थं स्वयमेव प्रकाशयन्ति। यथा "अदिप्रभृतिभ्यः शपः" (२-४-७३) इत्यनेन अदादिगणपठितधातुभ्यः परे शपः लुक् भवति येन हन् धातोः हन्ति इति रूपं भवति। तदनन्तरं "बहुलं छन्दसि" (२-४-७४) इति सूत्रेण वेदे हनति, शयते इति रूपाणि भवन्ति। तथैव "जुहोत्यादिभ्यः श्लुः" (२-४-७५) इत्यनेन ददादि इत्यादिरूपाणां सिद्धिर्भवति, तदनन्तरं "बहुलं छन्दसि" (२-४-७६) इत्यनेन दाति इत्यादिप्रयोगाः सिद्ध्यन्ति। एवं रूपेण अष्टाध्याय्यां लौकिकवैदिकप्रयोगाः सार्धं सिद्धाः भवन्ति, येन च अनायासेन वैदिकलौकिकशब्दानां सिद्धिर्भवति। इति शम्॥

**सन्दर्भसूची –**

---

11 महाभाष्यम्, प्रथमो खण्डः, पृ. १०

12 मीमांसासूत्रम्, १-३-३०

13 अर्थवन्तः शब्दसामान्यात्। निरुक्तम्, १-१६

14 अष्टाध्याय्याम्, ६-१-३४

15 तत्रैव २-३-६१

16 तत्रैव २-३-६२

17 अष्टाध्याय्याम्, २-४-३९, २-४-७३, २-४-७६, ३-२-८८, ५-२-१२२, ६-१-३४, ७-१-८, ७-१-१०, ७-१-१०३, ७-३-९७, ७-४-७८.

अष्टाध्यायीसूत्रपाठः, दीक्षितपुष्पाकृतप्रकरणनिर्देशसमन्वितः, संस्कृतभारती, नवदेहली, २०१०
ऋक्-प्रातिशाख्य और अष्टाध्यायी का तुलनात्मक अध्ययन, डॉ. मांगेराम यादव, परिमल-पब्लिकेशन्स्, दिल्ली, २००५
श्रीमद्वाल्मीकिरामायणम्, राष्ट्रियसंस्कृतसंस्थानम्, नव देहली, द्वितीयं संस्करणम्, २००५
पदमञ्जरी, चौखम्बा-संस्कृत-प्रतिष्ठानम्, नवदेहली, १९८७
परिभाषेन्दुशेखरः, सम्पादकः गणेशशास्त्रीगोखले, आनन्दाश्रममुद्रणालयः, पूणे, १९१३
महाभाष्यम् (भाष्यप्रदीपोद्द्योतोद्भासितम्), सम्पादकः शास्त्रिभार्गवः, चौखम्बा-संस्कृत-प्रतिष्ठानम्, नवदेहली, १९८७
मीमांसासूत्रम्, चौखम्बा-संस्कृत-प्रतिष्ठानम्, दिल्ली, १९९८
निरुक्तम्, सम्पादकः मुकुन्दझा शर्मा, चौखम्बा-संस्कृत-प्रतिष्ठानम्, दिल्ली, २००२